॥ श्रीनृसिंहनखस्तुतिः ॥

पान्त्वस्मान् पुरुहूतवैरि बलवन् मातङ्ग माद्यद्घटा ।
कुम्भोच्चाद्रिविपाटनाऽधिकपटु प्रत्येक वज्रायिताः ।
श्रीमत्कण्ठीरवास्यप्रततसुनखरा दारिताराऽतिदूर ।
प्रद्ध्वस्त ध्वान्तशान्त प्रविततमनसा भाविता भूरिभागैः [1] ॥ १॥

लक्ष्मीकान्तसमन्ततोऽपिकलयन् नैवेशितुस्ते समम् ।
पश्याम्युत्तमवस्तु दूरतरतोऽपास्तं रसो योऽष्टमः ।
यद्रोषोत्करदक्षनेत्रकुटिलः प्रान्तोत्थिताऽग्नि स्फुरत् ।
खद्योतोपमविस्फुलिङ्गभसिता ब्रह्मेशशक्रोत्कराः ॥ २॥

इति श्रीमदानन्दतीर्थभगवत्पादाचार्य विरचितं

श्री नृसिंहनखस्तुतिः सम्पूर्णम्

॥ भारतीरमणमुख्यप्राणान्तर्गत श्रीकृष्णार्पणमस्तु॥

---

[1] 'नाकिवृन्दैः' इति क्वचित् ।